International Journal of Sanskrit Research 2021; 7(6): 131-133

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(6): 131-133
© 2021 IJSR
www.anantaajournal.com
Received: 01-09-2021
Accepted: 03-10-2021

**Kajal Patra**
Ph.D. Scholar, Department of Sanskrit, Maharaja Sriram Chandra Bhanja Deo University Baripada, Mayurbhanj, Odisha, India

**Corresponding Author:**
**Kajal Patra**
Ph.D. Scholar, Department of Sanskrit, Maharaja Sriram Chandra Bhanja Deo University Baripada, Mayurbhanj, Odisha, India

# भागवते श्रीधरस्वामीदृष्ट्या पुरुषोत्तमश्रीकृष्णः

**Kajal Patra**

**उपक्रमः**

श्रीकृष्णलीलामाधुर्य व्याख्यानावसरे भावार्थदीपिकाकारः श्रीधरस्वामी दशमस्कन्धे मुख्यप्रतिपाद्यपुरुषत्तोमश्रीकृष्णस्य प्रणतिं तथा विषयान्तरं प्रतिपादनपुरस्सरं एकादशश्लोकैः श्रीधरस्वामी श्रीगणेशवन्दनपुर्वकं श्रीकृष्णाक्ष्यः परंब्रह्मणे प्रणतिं टीकाकारः व्याजहार। वेदप्रतिपादिततत्त्वमसिवाक्यप्रतिपन्नं ब्रह्मविषयकं शुभं हंसः इति तत्त्वं शिरसि निधाय श्रीधरस्वामी स्वकीयां महियसीटीकां लिखितवान्। कृष्णसंकीर्त्तनस्वरुपं तथा लीलाकदम्बवर्णनं पूर्णावतारं श्रीकृष्णं स्वभाषया श्रीधरस्वामी वर्णयति। यथा – श्रीयते सेव्यते ब्रह्मादिभिः श्रीकृष्णेन वा इति श्रीराधा तथा च राध्यते सा भगवता इति राधा। अत्र ”श्रीह्न शब्द राधार्थकः। यद्वाश्रयति राध्नोति सर्वदा वृंदावननिकुंजगं श्रीनंदनंदनमिति श्रीराधा। ”वृंदावने निकुंजस्थो राध्यते सर्वदा यया। नन्दसूनुरतो राधा सोच्यते मुनिसत्तमः।।ह्न इति पुराणांतरात्। कृषति निजसमीपमाकर्षति वेणुरवेण वल्लभीगणमिति कृष्णो यशोदानन्दनः। ननु मधुरगीतादिना त्वन्येऽपि प्रमदागणमाकर्षन्ति तत्र कोविशेष इत्यरुच्याहकृषति विलिखति निजानां संसारमिति कृष्णः। सदानंदस्वरुपो भक्तजनपापौघनाशकश्च। ”कृषिर्भूवाचकः शब्दोऽणश्च निर्वृतिवाचकः। तयोरैक्यं परंब्रह्मकृष्ण इत्यभिधीयते।ह्न इति श्रुतेः सदानन्दंरुपः ”कोटिजन्मकृतं पापं कृषिरित्युच्यते बुधैः। तन्नाशनकरोदेवः कृष्ण इत्यभिधीयतेह्न इति ब्रह्मवैवतीत्पापनाशकरुपश्च कृष्णपदार्थः। श्रिया सहितः कृष्णः श्रीकृष्णः यद्वा – ”श्रीश्च ते लक्ष्मीश्च ते पत्न्यौह्न इति श्रुतेः श्रीशब्देन राधा लक्ष्मीशब्देन रमा चात्सरस्वती ग्राह्या, केशवस्य प्रियां देवीमिति बृहस्पत्युक्तेः। तथा च श्रीश्च श्रीश्चेत्येकशेषसमासेन श्रिय इतिस्यात्, ततः श्रीभिः राधारमादिभिः सहितः कृष्णः श्रीकृष्णः। स आख्याऽभिधा यस्य तच्छ्रीकृष्णाख्यम्। दशमस्कन्धे जगतामाश्रपरंब्रह्मश्रीकृष्ण एव जीवनस्य निर्विशेषः सर्वश्रुतिपुराणप्रसिद्धः यदुकुलस्य अवतंशवासुदेवः भगवान् श्रीकृष्णः सर्वेषां प्रणिनां ध्येयज्ञेयश्च।

श्रीकृष्णमहिमा

कृष्णस्तु भगवान् स्वयं इति वाक्यात् श्रीकृष्णस्य परमात्मत्त्वं सिद्धं तत्र कृषिः भूर्वाचकशब्दः णश्च निवृत्तिवाचकः तयोरैक्यं परंब्रह्मंकृष्णेति अभिधीयते। तत्र कृष्णस्य अनुशयनेम निरोधः। अनुशयनं नाम लीलानुरुपा स्थितिः तत्र – ”निरोधस्यानुशयनं प्रपञ्चे क्रीडनं हरेः शक्तिभिः दुर्विभाव्याभिः कृष्णस्येति अलक्षणम्।ह्न

तत्र प्रपञ्चे विस्मृतिपूर्विका भगवत्आसक्तिनिरोधः नितरां रोधः निरोधः। अनयारीत्या व्याख्यानं पाटवं श्रीधरस्वामी टीकायां दरीदृश्यते। श्रीधरस्वामीना धर्मग्लानि निमित्तं निरोधस्य वर्णना निपुणतया विहिता। दशमस्कन्धे कृष्णः कलाकलापमधुरं पल्लविततया व्याख्यातं विद्यते। समग्रदशमस्कन्धस्य इतिवृतं नवर्त्तिध्यायेषु प्रतिपदं स्वकीयं वर्णनं भावार्थदीपिकायां सम्यस्तं कृतमस्ति। भक्तिमार्गे सर्वं सर्वमयं सर्वेसर्वार्थवाचकाः इति न्यायेन यथा भक्तिमुख्य तत्त्वराशिवर्णयन् श्रीधरस्वामी कृष्णलीलान्तर्गततत्त्वनिखिलं वर्णितवान्। वेदान्तविज्ञानं आत्मदर्शनं उपनिषदज्ञानं परमज्ञानभक्तिरुपं सर्वंतत्त्वं कृष्णं हि परमदैवम् इति न्यायेन श्रीधरस्वामिना सर्वं दर्शनं फलसाधनं कृष्णगुणानुकीर्त्तनं स्वटीकायां यथायथं वर्णितं विद्यते।

**श्रीधरस्वामीटीकावैशिष्ट्यम्**

श्रीधरस्वामी टीकायां वैशष्ट्यभूता प्रमुखविषयाः निच्चैः प्रदार्शिता सन्ति।

१. श्रीमद्भागवतस्य विषयवस्तुसकलं परमपुरुषार्थसाधकमिति।
२. सर्वेविषयाः निरोधलीलान्तर्गत सात्त्विकसाधनफलोपेता।
३. भावार्थदीपिकायां वर्णितः भगवान् श्रीकृष्णः षोडशकलापरिपूर्णः परंब्रह्मेति।

४. कृष्णःपरमात्मा शुद्धः, सर्वज्ञः, सनातनः, सर्वकारण कारणः, निर्गुणः निर्विशेषश्च।
५. श्रीधरस्वामिटीकायां भगवतः कृष्णस्य ज्ञानशक्ति, इच्छाशक्तिः, क्रियाशक्तिरुपा त्रिविधा शक्तिः प्रपञ्चिता।
६. टीकासु परमेश्वरकृष्णस्य पञ्चविधं कृत्यं यथा सृष्टिस्थिति-संहार-निरोध-तिरोभाव रुपं संसुचितं विद्यते।
७. कृष्णस्य पुर्णावतारत्वं-"एते चां – शकला पुंस कृष्णस्तु भगवान् स्वयमिति वाक्यात् प्रमाणीकृतम्।
८. श्रीधरस्वामिटीकायां साध्यसाधनभक्तिः विशदी कृता।
९. आत्मैवेदं सर्वमिति शृत्यनुरोधात् श्रीमद्भागवतस्य द्वैताद्वैत तत्त्वं स्फुटतया वर्णितम्।

अत्र नीचैः श्रीधरस्वामीपादानां टीकासम्बलितकानिचित् तथ्यानि निच्चैः प्रदतानि सन्ति।

तस्मादुपेक्षा दोषपरिहारायैवं कारिष्यामित्याह। प्रदायेति। मृत्यवेऽस्मै कंसाय। नन्विदमपि नैव न्याय्यमित्याशंक्याहसुता इति। अस्यां यदि सुता मे जायेरं स्तदा हयह्माविं तद्भवतु जीवनं तु तावदस्या भवेदेव। तदंतरा यद्ययमेव म्रियेत तदा न किंचिदन्याय्यम् ४९। यवि च सुता भाविष्यंति न चायं म्रियते तदा मत्पुत्रादेचास्य मरणमिति विपर्ययो वा किं न स्थात्। ननु प्रौढत्य कंसस्य तव बालकात्कथं मृत्युः स्यात्तत्राध। गतिरिति। "अस्यास्त्वामष्टमो मर्भो हंताह्न इत्युक्तवंतो धातुः। अत इदानीमपत्यार्पण प्रतिज्ञैव मंत्रः। तथा उपस्थितो भृत्युरयं तावन्निवर्तेत। निवृत्तः पुनः कालांतरे आपतेच्चेत्तदा नापराधो ममेत्यर्थः। अथ ऽस्य मत्पुत्रादु पस्थितो यो मृत्युरस्या वधान्निवर्तेत यो मृत्युरस्या वधान्निवर्तेत अन्यथा स्यात्तदा स पुनरनेन मम मंत्रण निवृत्तोप्यापतेत्। भवेदेव तदिष्टमित्यर्थः। यद्वा गविर्धातु दुर्रत्ययेत्येतस्थैव प्रपंच उपस्थित इति ५०। प्राणिनामदृष्टं च पुनर्दुवितिक्र्यमिति सहष्टांतमाह। अग्नेरिति वने वृक्षान्प्रदहनह्निः शन्निहितानपि वृक्षान्परित्यज्य कदाचिद्दूरस्थानपि दहति प्रामे गुहान्वा न हस्य प्राणदृष्टन्यतिरेकेण किंचिन्नियामकमस्ति यथा। एवं जंतोर्जन्ममरणयोरपि हेतुर्दुर्विभान्योऽचिंत्यः अत एतदुपर्यस्या अदृष्टमेव हेतुरिति भावः ५१। यावदात्मनिदर्शनं स्वप्रज्ञावधि विचार्य ५२।

ऋषेर्नारदस्य। विनिर्गमे गमने सति। स्ववधं प्रति मत्वा च ६५। निगहैरंदुर्कः 9अंदुको निगहोऽस्त्रो स्यात्" इत्यमरः। निगृह्य निरुद्ध च। अयमेव मत्संहर्ता विष्णुरिति शंकाया। जातं जात्तमुत्पन्नमुत्पन्नम्। इतवान्न तु जन्मकाल एव। तथा सति नामकरणासंभवे कीर्त्तिमं तमित्युक्तेरसांगत्यं स्यादिति भावः। युग्मम् ६६। परप्राणैः स्वत्राणांस्तपेयंति ये तेऽसुतृपः। राजानस्तु प्रायशो बाहुल्येन "मा राज्य श्रीरभूतु सः श्रेयस्कामस्य मानद। सुजनानुत वा बंधुन्न पश्यति ययांधंहकृह्न।। इति वक्ष्यमाणत्वात् ६७। प्राक्तूर्वजन्मनि जानन् नारदोकतोरिति शेषः। स कंसः ६८। चात्तत्संवंधिनोपि। स्वयं बुभुजे न केनाचिदाभिषिक्त इत्यर्थः ६९।

**श्रीकृष्णावतारमहत्वम्**

श्रीकृष्णावतार समन्धे भागवतकारेण दशमस्कन्धस्य प्रथमाध्ये यथायथं वर्णितं विद्यते। यत्र भगवतः श्रीकृष्णस्य ऐश्वर्यमाधुर्यमण्डितलीलानां वर्णनं परिलक्षते। दशमस्कन्धस्य पूर्वार्धे राजा परीक्षितेन शुकमुनिं प्रति भक्तिनिवेदनपुरसरः पृष्टं हे भगवान्! असुराणां मुक्तिदात्ता तथा भक्तानां परमप्रेमावतार भगवान् श्रीकृष्णवाल्यवयसि स्नेहपूर्णं पितृगृहं परितेज्य कथं ब्रजं चलितवान् अपि च यदुवंशचूडामणि कृपावतारः श्रीकृष्णः नन्दस्तथा गोपबन्धुभिः सार्धं कुत्र कुत्र निवसति स्म एवं च ब्रजधाम्नि मधुपुर्यां निवसन् भगवान श्रीकृष्णः किदृशीं किदृशीं लीलां संपादितवान् तत् वर्णयन्तु। अनन्तरं श्रीशुकमुनिः प्रोक्तवान् यत् – हे राजर्षिपरीक्षित! भगवान् श्रीकृष्ण सौन्य आराध्यः सेव्यः विभुव्यापकश्च। तस्य लीला श्रवणे तव परमप्रीतिहृदि संजाता। अत्र पुनः शुकमुनिः उक्तवान् यदा दैत्याः अंहकारप्रवणनृपतिरुपेण पृथ्वीं सन्तप्तां कृतवन्तः तेभ्यः नृपतिभ्यः परित्राणाय पृथ्वी ब्रह्मा सन्निधौ गतवती। अतः सा पृथ्वी तस्मिनवसरे गौरुपं धृत्वा नेत्रलोतकपूर्णा सती रुदति स्म। ब्रह्मा निकटे सा गौरुपापृथ्वी स्वकीयं सन्तापं वर्णितवती। अनन्तरं देवाधिदेवशंकरः स्वर्गस्य कतिपयः प्रमुख देवगणाः पृथ्वीं धृत्वा समुद्रतटं प्रस्थितवन्तः। परमात्मा दुःखहर्त्ता शान्तिप्रदाता योगक्षमविधाता च क्षीरसमुद्रसन्निधौ ब्रह्मा सर्वेदेवाः पुरुषसुक्तद्वारा भगवतः श्रीकृष्णस्य स्तुतिं कृतवन्तः। तस्मिनवसरे स्तुतिं गानमयं ब्रह्मा समाधिस्थसंजातः। समाधिदशायां आकाशवाणी संजाताः तत् आर्कण्यं ब्रह्मा देवेभ्यः उक्तवान् यत् भगवतागोरुपी पृथ्वीव्याः कष्टं प्रथमतया अवगतम्। यतः स इश्वराणां इश्वरः भवति। वसुदेवस्य गृहे स्वयं पुरुषत्तमभमवान् लीला विवर्धनाय जन्मग्रहणं कृतवान्।

मुनिप्रवरशुकदेवः कथयति हे परीक्षित! प्राचीनकाले यदुवंशस्य राजा आसीत् "शूरसेनःह्न। शूरसेनः मथुरानगरे स्थित्वा माथुरमण्डलस्य तथा शूरसेनमण्डलस्य राज्यशासनं करोति स्म। तस्मिनवसरे मथुरा एव यदुवंशीनरपतीनां राजधानी संजाताः। अनन्तरं मथुरायां शूरसेनस्य पुत्रः वसुदेवः विवाहं कृत्वा स्वकीया नवविवाहितां पत्नीं देवकीं धृत्वा रथोपरि यात्रां कृतवान्। उग्रसेनस्य पुत्र आसीत् कंसः। स कंसः भगिनीतुल्यादेवकीं सन्तुष्टां कर्तुं अभिलक्षीतकृतवान्। देवक्याः पिता देवक आसीत्। देवकस्य कन्या देवकीनिमित्तं कन्याविदायवेलायां सुवर्णालङ्कारभूषितं चर्तुशतं गजं तथा पञ्चदशसहस्रं घटकं, अष्टादशशतं रथयानं तथा शतद्वयं सुकुमारीगणं देवक्या दासीनिमित्तं यौतुकरुपेण दत्तवान्। भगिनी देवकीं धृत्वा कंसः यदा भगिनीं प्रति वसुदेवस्य गृहं गच्छन्नासीत् तदा आकाशमार्गे काचित् वार्त्ता कंसं प्रति आगता। तथा हे मूर्ख! - यस्मिन् रथे उपविश्य भवान् भगिनीं धृत्वा गच्छति तस्या भगिन्या अष्टमगर्भपुत्रः भवतः मृत्योः कारणं भविष्यति। कंसः वस्तुतः पापात्मा आसीत्। स भोजवंशस्य कलंक आसीत्।

आकाशवाणीं श्रुत्वा कंसः स्वस्य खड्गं निष्कास्य देवकीं हन्तुं वद्धपरिकरः जातः। तस्मिन्परिसरे वसुदेव उक्तवान् – हे कंस! भवान् सूरवीरः कीर्त्तिमान् यशस्वी च। अतः भगिन्याः प्राणहानी भवता न कर्त्तव्यः। अतः प्रशंसादिसामनीतिं भेदनीतिं वर्णयित्वा भविष्ये जायमानं सर्वपुत्रं कंसाय दास्यतीति वसुदेवः प्रतिज्ञातवान्। अतः देवकीसकाशात् किमपिभयं नास्ति इति श्रृत्वा वसुदेवस्य वचनं सत्यं मत्वा कंसः देवकीं न हतवान्। ततः शुकदेवः परीक्षितं कथितवान् – कंसः स्वयं महान् प्रतापी आसीत् तथा मगधराजजरासन्धस्य मित्रमासीत्। तस्य सहृदयवान्धवा आसन् प्रलम्वासुरः, वकासुरः, चाणुरः, तुणावर्त्तः, अघासुरः, मुष्टिरः, द्विविदः, पूतना, केशी तथा धेनुकेति। एतत् विहाय बाणासुरः तथा भौमासुरः कंसस्य सहायको आस्ताम्। भगवता कृष्णेन दृष्टः यत् कंसद्वारा यदुवंशस्य महान् अनिष्टं भविष्यति। ततः भगवान् योगमायां आदिष्टवान्, हे कल्याणि! त्वं ब्रजं गच्छ। तत्र गोसंपदैः स्वप्रदेशः सुशोभित आसीत्। तत्र च नन्दराजस्य गोकूले वसुदेवस्य पत्नी रोहिणी निवसति स्म। वसुदेवस्य अपरापत्नीद्वयं च कंसभयात् स्थानान्तरे निवासं कृतवान्। तथा च ममांशः यः शेषः देवक्याः गर्भे विद्यते तादृशं गर्भस्थं शिशुं देवक्याः गर्भात् निष्काष्य रोहिणीगर्भे स्थापयितुः। यथा अहं ज्ञानबलषोडशकलाभिः सहितं देवक्याः गर्भे आर्विभविष्यामि। त्वं योगमाया नन्दराजपत्नीयोशदायाः गर्भे जन्मग्रहणं कुरु। त्वं योगमाया पृथीव्यां दुर्गा, भद्रकाली, विजया, वैष्णवी, कुमुदा, चण्डीका, कृष्णा, माधवी, कन्या, माया, नारायणी, ईशानि, शारदा तथा अम्बिकादि नामानि गृहीत्त्वा जनाः त्वां पूजयीष्यन्ति। अनन्तरं सर्वात्मस्वरुपपरमात्मा श्रीकृष्णः वसुदेवस्य हृदि अव्यक्तवभूत्वापि आत्मानुव्यक्तं कृतवान्।

**उपसंहारः**

भगवान् विशुद्धसत्यमयः शाश्वतः भक्तभक्तिपरायणः भवति। जन्ममृत्युसंसारचक्रात् स मुक्तपुरुषः लक्ष्यते। अतः सर्वाधिष्टानकृष्णः यदुवंशस्य रक्षानिमित्तं सकललीलापरिपूर्णभूत्वा आत्मानं प्रकटितवान्।

श्रीशुकदेवः कथयति हे राजन्। रोहिणी नक्षत्रं यदा आसीत्, आकाशे सर्वाणि नक्षत्राणि ग्रहतारकादयोः शान्ता आसन्। सर्वा दिशः स्वच्छासन्। नगराणि, ग्रामाः, कूटीरादयोऽपि सुशोभिता आसन्। नद्याः जलं निर्मलं, पंकजमपि सरोवरे सुशोभमानमासीत्त्। विविधरंगपुष्पाणि आसन्। तथा भ्रमराः मधुपानलालसया गुंजन्ति स्म। तस्मिन्नेव समये षोडशकलापरिपूर्णः भगवान्विष्णुः देवकीगर्भे प्रकटितोऽभूत्। वसुदेवः दृष्टवान्, सम्मुखे अद्भूतबालकः यस्य नेत्रपङ्क्तिः पदमपलासमिव कोमला, रम्यहस्तेषु शंख-चक्र–गद-पद्म सुशोभितं वक्षसि श्रीवत्सस्य पदचिह्नं सुवर्णायमानमासीत्। गले कौस्तुभमणिः विद्यते स्म। वर्षाकालीन मेघसदृशः परमघनश्यामः नवीनदुर्वादल इव पिताम्बरपरिहितः मनोहरः दृश्यते स्म। वैदुर्यमणिशोभितकिरिटकुण्डलकान्तिद्वारा सूर्यसदृशः देदीप्यमान भगवान् कृष्णचन्द्रः जन्मसमये दिव्यप्रभया प्रभावित आसीत्।

## सन्दर्भ ग्रन्थ सूची


1. श्रीमद्भागवतमहापुरणम् महर्षिव्यासःगीताप्रेस, गोरखपुर
2. श्रीमद्भागवद्गीतामहर्षिव्यासः गीताप्रेस, गोरखपुर
3. सांख्यदर्शन डा. विजयानन्द कर ओडिशा राज्यपाठ्यपुस्तक प्रणयन प्रकाशन संस्था
4. ऋग्वेदसंहिता पण्डित श्रीराम शर्मा जगन्नाथप्रेस्, कटक
5. आत्मबोध शङ्कराचार्य सेन्ट्राल चिन्मयमिशन्
6. भागवतकथा पुज्यपाद प्रभुदत्त ब्रह्मचारी कटकष्टुडेण्टष्टोर